न्तः सर्वाणि भोगसाधनान्यात्मभोगायैव व्याप्रियन्ते तद्व्यापारश्चादृष्टवदात्मसंयोगापेक्षः। अतोऽसौ सर्वगत इति। तत्र किं यस्मिन्नात्मप्रदेशेऽदृष्टं तत्प्रदेशसंयोगोऽपेक्ष्यते उता दृष्टोपलक्षितात्मसंयोगः। नाद्यः। देहावच्छिन्नात्मसमवेतादृष्टस्य स्वर्गभोगाहेतुत्वात्। न द्वितीयः मोक्षेऽपि भोगप्रसङ्गात्। तस्मादागमादेव सर्वगतत्वसिद्धिः। नचायमात्मा जड़ः प्रत्यक्षानुमानागमैः स्वप्रकाशत्वावगमात्। तत्र प्रत्यक्षं सौषुप्तमवगन्तव्यम्। अनुमानान्यपि आत्मा स्वप्रकाशः स्वसत्तायां प्रकाशव्यतिरेकरहितत्वात् प्रदीपवत् संवेदनवच्च तथा विषयप्रकाशकर्त्तृत्वात् प्रदीपवत्, विषयप्रकाशाश्रयत्वादालोकवत्। अनिन्द्रियगोचरत्वे सति अपरोक्षत्वात् संवेदनवत्। अयमात्मा सति धर्मिणि अजन्यप्रकाशगुणः प्रकाशगुणत्वादादित्यवत्। आगमश्चात्र "अयं पुरुषः स्वयंज्योतिरित्यादिः। सचायमात्मा सर्वशरीरेष्वेक एव सर्वत्राहमित्येकाकारप्रत्ययवेदनीयत्वात् गोत्ववत्। शरीराणां भिन्नत्वादेवातीतशरीरादाविव न भोगानुसन्धानप्रसङ्गः। ननु तर्ह्येकस्यापि मनुष्यशरीरस्य प्रतिक्षणं परिणामभेदे सत्यत्रापि आत्मनोभोगाननुसन्धानं प्रसज्येतेति चेत् न तदेवेदं शरीरमिति प्रत्यभिज्ञया तदेकत्वावगमात्। न च ज्वालाप्रत्यभिज्ञावद्भ्रान्तत्वम् तत्र सूक्ष्मदर्शनेन प्रत्यक्षत एव ज्वालानां भेददर्शनात् अत्र तदभावात्। तदेवमेकः स्वप्रकाश आत्मेति सिद्धम्। तमेतमात्मतत्त्वमवैदिका देहादिबुद्ध्यन्तपदार्थरूपत्वेन प्रतिपन्नाः मीमांसकादयस्तु तस्य देहादिव्यतिरेकं प्रतिपद्यापि कर्त्तारम्भोक्तारमिच्छन्ति। तदेतत् सांख्या न सहन्ते। न तावदात्मनः कर्त्तृत्वं स्वाभाविकम् सर्वगतस्य निरवयवस्यात्मनः परिष्पन्दपरिणामलक्षणक्रियावेशायोगात्। स्वाभाविकत्वे चैतन्यवत् क्रियावेशो न कदाचिदपि व्यभिचरेत्। नापि कर्त्तृत्वमागन्तुकं निरवयवे कर्त्तृत्वहेतूपरागायोगात्। नापि बुद्धेः कर्त्तृत्वमात्मन्यारोपयितुं शक्यं अख्यातिवादे भ्रान्त्यभावात्। तस्मान्नास्ति कर्त्तृत्वम्। न चैवं भोक्तृत्वमपाकर्त्तुं शक्यम्। न हि सुखदुःखान्वयोभोगः येन कर्त्तृत्ववत् व्यभिचरेत्। किन्तु चिद्रूपत्वेन दृश्यसाक्षित्वम्। तस्माद्भोक्तैवात्मेति सांख्यानां पक्षः। वैशेषिकयोगनैयायिकाः उक्ताद्भोक्तृजीवादतिरिक्तः सर्वज्ञः सर्वशक्तिः ईश्वरः कश्चिदस्तीत्यनुमिमते। विमतं जगत् स्वरूपोपादानाद्यभिज्ञकर्त्तृकं विविधकार्य्यत्वात् प्रासादादिवत् तत्र कल्पनालाघवेनैककर्त्तृत्वोपादानात् सर्वज्ञत्वादिसिद्धिरिति वैशेषिकाः। विमताः ज्ञानैश्वर्य्यशक्तयः क्वचित् पराकाष्ठा प्राप्ताः सातिशयत्वात् परिमाणवदिति योगाः। विमतं धर्म्माधर्म्मफलं कर्म तत्फलभोक्त्राद्यभिज्ञेन दीयते व्यवहितकर्म्मफलत्वात् सेवाफलवदिति नैयायिकाः। नन्वीश्वरपक्षोपन्यासो न युक्तः यतोऽत्र जिज्ञास्ये प्रत्यगात्मरूपे ब्रह्मणि विप्रतिपत्तिर्दर्शयितुं प्रक्रान्ता, नैषदोषः प्रत्यगात्मा तस्मादीश्वरादन्योऽनन्योवेति प्रत्यगात्मविप्रतिपत्तावेव पर्य्यवसानात्" इत्यन्तेन। प्रपञ्चस्तु चार्व्वाकादिशब्दे वक्ष्यते। भाषापरिच्छेदे मुक्तावल्याञ्चात्मनिरूपणायेत्थमभ्यधायि "आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्त्तृकम्। शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः। तथात्वञ्चेदिन्द्रियाणामुपघाते कथं स्मृतिः। मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्। धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः। प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः। अहङ्कारस्याश्रयोऽयं मनोमात्रस्य गोचरः। विभुर्बुद्ध्यादिगुणवान्" भाषा०। "आत्मानं निरूपयति आत्मेन्द्रियेति आत्मत्वजातिस्तु सुखदुःखादिसमवायिकारणतावच्छेदकतया सिध्यति ईश्वरेऽपि सा जातिरस्त्येव अदृष्टादिरूपकारणाभावाच्च न सुखदुःखाद्युत्पत्तिः नित्यस्य स्वरूपयोग्यस्य फलावश्यम्भाव इति नियमस्याप्रयोजकत्वात्। परे तु ईश्वरे सा जातिर्नास्त्येव प्रमाणाभावात् न च दशमद्रव्यत्वापत्तिः ज्ञानवत्त्वेन विभजनादिति वदन्ति। इन्द्रियादीति। इन्द्रियाणां शरीरस्य च परम्परया चैतन्यसम्पादकः। यद्यप्यात्मनि "अहं जाने अहं सुखीत्यादि" प्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्तत्प्रतीतिगोचर इति प्रतिपादयितुं न शक्यत इत्यतः प्रमाणं दर्शयति करणमिति। कुठारादीनां छिदादिकरणानां कर्त्तारमन्तरेण फलानुपधानं दृष्टम् एवं चक्षुरादीनां ज्ञानकरणानां फलोपधानमपि कर्त्तारमन्तरेण नोपपद्यत इत्यतिरिक्तः कर्त्ता कल्प्यते। ननु शरीरस्यैव कर्त्तृत्वमस्तु अत आह शरीरस्येति ननु चैतन्यं ज्ञानादिकमेव मुक्तात्मनां तन्मत इव मृतशरीराणामपि तदभावे का क्षतिः प्राणाभावेन ज्ञानाभावस्य सिद्धेरिति चेन्न शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थाविरे स्मरणानुपपत्तेः शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात् न च पूर्व्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उपपद्यत इति